International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(4): 60-64
© 2026 IJMH
www.themultijournal.com
Received: 22-06-2026
Accepted: 17-07-2026
Publish : 18-07-2026

**अदिति सामन्तः**
शोधार्थिनी, शिक्षाशास्त्रविभागः,
श्री लालबहादुर शास्त्री राष्ट्रिय संस्कृत-विश्वविद्यालयः,नव देहली-110016

**मार्गनिर्देशकः**
**डॉ.प्रेमसिंहसिकरवारः**
शिक्षाशास्त्रविभागः,
श्री लालबहादुर शास्त्री राष्ट्रिय संस्कृत-विश्वविद्यालयः, नव देहली-110016

**Correspondence:**
**अदिति सामन्तः**
शोधार्थिनी, शिक्षाशास्त्रविभागः,
श्री लालबहादुर शास्त्री राष्ट्रिय संस्कृत-विश्वविद्यालयः,नव देहली-110016

# परभानृत्यम्, एकस्याः लुप्तप्रायसंस्कृतेः ऐतिह्यानुसन्धानम्

**अदिति सामन्तः, डॉ. प्रेमसिंहसिकरवारः**

**सारांशः**

चिलकिगडराजगृहे शिवस्य गाजनोत्सवे द्वादशदिनानि यावत् उत्सवः भवति स्म। राजा ईश्वरचन्द्रः धवलदेवः झाड़ग्रामस्य काठियामुखडानृत्यस्य अनुकरणे एकस्य अभिनवस्य मुखडानृत्यस्य परिकल्पनां कृतवान्। स काठियामुखडानृत्येन सह पौराणिकवातावरणं निर्माय द्वादशदिवसेषु द्वादशदेवतानां मर्त्यं प्रति आगमनकल्पनां कृत्वा प्रत्येकस्यै देवतायै प्रतिदिनं पृथक् नृत्यस्य परिकल्पनां कृतवान्। सः द्वादश देवदेवीषु प्रत्येकस्य कृते मस्तकतः कटिदेशपर्यन्तं काष्ठनिर्मितं मुखाच्छादकं (मुखोश) निर्मितवान्। राजगृहे गाजनोत्सवस्य द्वादेशदिनानि यावत् प्रत्येकस्यां रात्रौ एकैकस्य देवस्य मुखोशनृत्यकरणाय द्वादशमुखोशानां मुखाच्छादकानां वा निर्माणं तैः कृतम्। कटिदेशपयन्तं विस्तृतस्य अस्य काष्ठनिर्मितस्य मुखोशस्य मुखाच्छादकस्य वा नाम आसीत् परभा इति। परभां धृत्वा कृतस्य नृत्यस्य नाम आसीत् परभानृत्यम्।

कालामिस्त्री दिवानक्तं परिश्रमं कृत्वा राज्ञः निर्देशानुसारं परभां निर्मितवान्। एकैकेन काष्ठखण्डेन (वृक्षखण्डेन) एकैकस्याः परभायाः निर्माणं भवति स्म। राज्ञा ईश्वरचन्द्रेण तेन तक्षकेण (कालामिस्त्री) आहत्य द्वादशपरभाः निर्मिताः। ताः द्वादश परभाः भवन्ति- गणेशः, कार्तिकः, शिवः, दशभूजा, अरूणः, वरुणः, अष्टभुजा, शिवदुर्गा, चतुर्भुजा, गौराङ्गः, पवनः, यमः चेति। राज्ञा चिलकिगडस्य निवासी दण्डछत्रमाझिः प्रजाः नीत्वा एकं नृत्यदलं निर्मितवान्।

एकैका परभा यदा सभां प्रविशति तदा परभां तस्याः वाहनं च द्वौ जनौ धृत्वा निष्ठतः। परभा यदा सभां प्रति प्रविशति तदा केचन पुरुषाः महिलानां वस्त्रेण सज्जिताः सन्तः वाद्यस्य तालेन सह नृत्यं कुर्वन्ति। प्रत्येकस्याः परभायाः वाद्यतालं भिन्नं भवति। परभानृत्ये वाद्यस्य तालानुसारेण नृत्यमेव परभानृत्यम्। नृत्यस्य दर्शनेन मन्यते यत् एकः देवता स्वर्गतः मर्त्यम् आगच्छति, एवमेव मर्त्यवासिनः तं नृत्यं कुर्वन्तः शोभायात्रां कृत्वा आनयन्ति। चैत्रमासे राजगृहस्य शिवस्य यः गाजनोत्सवः भवति स्म, तत्र द्वादशदिनानि यावत् मेला भवति स्म, प्रत्यहं रात्रौ एकैकां स्वीकृत्य नृत्यं भवति स्म। अतः द्वादश परभाः निर्मिताः भवन्ति स्म।

**प्रस्तावना**

मुखोशनृत्यमिति कथनेन सर्वादौ छौनृत्यस्य स्मरणं भवति। एवमेव छौनृत्यस्य कथनेनैव मनसि भासते डा. आशुतोषभट्टाचार्यस्य नाम। 1972 ईशवीयाब्दे आशुतोषभट्टाचार्यस्य नेतृत्वेन पुरुलियायाः (बङ्गप्रदेशस्य) छौनृत्यं विदेशे प्रदर्शनानन्तरमेव परिवेशनामन्तरमेव वा छौनृत्यं व्यापकतया जनप्रियताम् आर्जयत्। वस्तुतः प्रायः मुखौटा, मुखौश, मुखोश -छौ, चेत्यादयः शब्दाः एकस्यैव नृत्यस्य प्रदेशानुसारं विविधानि नामानि सन्ति। इतोऽपि स्पेष्टतया उच्यते यत् पुरुलियायाः घराणाछौनृत्यं विहायापि छौनृत्यस्य इतोऽपि द्वे धारे स्तः यथा - झाडखण्डस्य सेराइकलाघराणा तथा ओडिशाराज्यस्य मयूरभञ्जघराणा चेति। एतासु छौनृत्यधारासु सर्वापेक्षया प्राचीनाधारा भवति सेराइकलाघराना छौनृत्यमिति। अनुसन्धातारः मन्यन्ते यत् तत्कालीनः विहारः तथा इदानीन्तन- झाडखण्डस्य सेराईकला एव छौनृत्यस्य जन्मस्थानमिति। सेराईकलायाः सिंदेऔ-राजपरिवारः आसीत् अस्य छौनृत्यस्य

पृष्ठपोषकः। मयूरभञ्जस्य भञ्जराजस्य उत्साहेन सेराइकलातः छोनृत्यं मयूरभञ्जम् आगतमासीत्। पुरुलिया 1956 ईशवीयाब्दयावत् पूर्वमपि आसीत् झाडखण्डे (तत्कालीने विहारे)। सुप्राचीनकाले (अतीतकाले) वागमुण्ड्याः( स्थानविशेषस्य) राजा सेराइकलातः कश्चित् छोनृत्यगुरुं पुरुलियायाः वागमुण्डीम् आनीय छोनृत्यस्य प्रवर्तनं कारितवान्।

लोकसंस्कृतिविदा डा. आशुतोषभट्टाचार्येण उक्तम् ईशवीयाब्द-सप्तदशशतकात् पूर्वं कदाचित् वाघमुण्ड्या हिन्दुभावापन्नानाम् अनार्यनृपाणां पृष्ठषोषकतया मुण्डारीप्रजाः वाघमुण्ड्यां छोनृत्यस्य प्रवर्तनं कृतवन्तः। राजा हिन्दुशास्त्राचाराणां पालनाय यथा पार्श्ववर्तिभ्यां विहारोडिशाराज्याभ्यां ब्राह्मणान् आनीय वासस्थानाय विभिन्नेषु स्थानेषु भूमिदानं कृतवान् तथैव देवदेवीमूर्तिनिर्माणाय विविधानां तेजसपत्राणां निर्माणाय राजगृहस्य समीपे चडिदाग्रामे मृच्छिल्पीभ्यः भूमिमपि दत्तवान्। अनुमीयते यत् वाघमुण्डीत्यस्य मृच्छिल्पिनः प्रथमे मृत्तिकया वस्त्रेण च (मुखोश) मुखाच्छादकं निर्माय, परञ्च 'शोला' इत्यनेन (sholapith) मुखाच्छादकं निर्माय छोनृत्यस्य आधुनिकपद्धतिम् उद्भावितवन्तः। 1972 ईशवीयाब्दे वाघमुण्डिछो-नृत्यस्य विदेशे परिवेशनकाले एतेषां मुखाच्छादकाः वर्णमयाः वर्णाढ्याः च आसीत्।

**पाईकनृत्यस्य धारातः छोनृत्यस्य उत्भवः**

वस्तुतः (जङ्गलमहलस्य) वणाञ्चलस्य वा नृपाः सर्वे आरक्षकानां स्थानीयभाषायां पाइक इति उच्यते। नियुक्तिं कारयन्ति स्म। साधारणतः मुण्डा-माझि-वागदि-वाऊरिप्रभृतीनां सम्प्रदयानां शारीरिक-शक्तौ वलीयांसः युवकाः एव पाईकरूपेण नियुक्ताः भवन्ति स्म। पाईकजनाः निःशुक्लं निष्करं वा पाईकनक्षेत्रं भोगं कुर्वाणाः सर्वदा दण्डहस्तेन गृहीत्वा राजाज्ञायै अपेक्षां कुर्वन्ति स्म। ते सर्वे स्वदेहे वर्णमयीं मृत्तिकां लेपयन्ति स्म। कदाचित् वा विविधानि बर्णमयानि मुखाच्छादकानि (मुखोश) अपि धरन्ति स्म। पाइकजनाः शरीरचर्चाक्षेत्रे (आखड़ा) नियमिततया शक्तिचर्चां कुर्वन्ति स्म। शारीरिकाभ्यासं दर्शयितुं नृत्यस्य अभ्यासं कुर्वन्ति स्म, दण्डक्रिडामपि कुर्वन्ति स्म। उत्सवकाले ते सर्वेषां सम्मुखे नृत्यदण्डक्रीडादीन् प्रदर्शयन्ति स्म। कालान्तरेण तेषां एतादृशं नृत्यक्रिडादि विभिन्न नाम्ना परिचितम् अभवत्। कैश्चित् उच्यते मुखाच्छादकं (मुखोख) धृत्वा यत् नृत्यं भवति तस्य नृत्यस्य अर्थात् पाईकनृत्यस्य धारातः छोनृत्यस्य उत्भवः जातः। वंशदण्डं खीकृत्य कृतस्य पाइकनृत्यस्य धारातः 'रायवेशे' इति नृत्यस्य उत्पत्तिः अभवत्। बङ्गभूमौ प्रथमस्य नृत्यस्य छोनृत्यस्य प्रधानः पृष्ठपोषकः आसीत् ड. आशुतोषभट्टाचार्यः, तथा द्वितीयस्य पाइकनृत्यस्य पृष्ठषोषकः आसीत् श्रद्धेयः गुरुसदयदत्तः। पूर्वं छोनृत्यस्य स्वरूपं कीदृशम् आसीत् तत्केवलं अनुमानं कर्तुं शक्यते। 1911 ईशवीयाब्दे सम्राजः पञ्चमजर्जस्य आगमनोपलक्षाय कलकातायाः ब्रिटिशद्वारे (सभायां वा) मयूरभञ्जस्य महाराजा तस्य राज्यस्य छोनृत्यस्य उपस्थापनं कारितवान्। तन्नित्यं कलकातायाः स्टेटम्यानपत्रिकायाम् उक्तं- "उड़िया सैन्यदेर पाइकनृत्य वा पाईक नाच" इति। एतेन अनुमीयते पाइकनृत्यात् छोनृत्यस्य उद्भवः अभवत्। आशुतोषमहाशयेन छोनृत्यं छौनृत्यमिति अति उत्तम्। 'छाउनि' इत्यस्मात् बङ्गशब्दात् अथवा संस्कृतस्य 'सङ्' इति शब्दात् अथवा छक् इत्यस्मात् मुण्डारीशब्दात् छौनृत्यस्य उद्भवः भवितुम् अर्हति। 'छक्' इति मुण्डारीशब्दस्य अर्थः वर्तते प्रेतात्मा इति। अर्थात् छौनृत्यं छोनृत्यं वा छनृत्यं वा भवति प्रेतात्मनः नृत्यमिति। आशुतोषमहोदयेन उक्तं- छोनृत्यं शिवस्य प्रधानानुचरस्य प्रेतस्य नृत्यमिति। अत्र शिवस्य वार्षिकोत्सवस्य गजनेत्यस्य समये शिवमन्दिरस्य समीपे मुक्ताङ्गने छोनृत्यस्य अनुष्ठानं भवति। वर्णमयमुखाच्छादकं गृहीत्वा कृतस्य पुरुलियायाः छोनृत्यस्य जनप्रियता एतावती महती आसीत् यत् (मुखोश) मुखाच्छादकोपरि किमपि लोकनृत्यमेव छोनृत्यमिति जनैः मन्यते। किन्तु प्रश्नः भवति मुखोशपरिहृतस्य मुखाच्छादकपरिहृतस्य अस्य नृत्यस्य परम्परा इयं कस्मात् जङ्गलमहले आगता?

**झाडग्राममण्डलस्य छोनृत्यम्**

क्षेत्रसमीक्षया ज्ञायते यत् मुखाच्छादकं (मुखोश) धृत्वा नृत्यं झाडग्रामभूखण्डे बहुकालात् प्रचलितं वर्तते। किन्तु तस्य नाम आसीत् पृथक् पृथगिति। गाजनस्य (शिवभक्तानां वङ्गीयकार्यक्रमविशेषः) शोभायात्रायां भक्ताः मकरसंक्रान्तिकाले दण्डक्रीडायां केचन मुखाच्छादकं (मुखोश मुखडा वा मूहडा व) धृत्वा नृत्यन्ति। झाडग्रामस्य लोकशिल्पिभिः अधिकं 'मुखडा' 'मुहडा' वेति नाम अधिकं व्यवह्रयते। गाजनकाले भक्ताः यदा नद्याः जलाशयात् वा गडियाभारं (काष्ठविशेष) स्वीकृत्य शोभायात्रां कृत्वा मन्दिरं प्रत्यागच्छन्ति तदा भक्ताः मुखडां धृत्वा नृत्यन्ति स्म। अस्य मुखडानृत्यस्य अन्यतमा वलिष्ठा धारा वर्तते छोनृत्यम्।

क्षेत्रसमीक्षयां इतोऽपि ज्ञायते यत्, मयूरभञ्जस्य राजा, सेराइकलायाः राजा, वाघमुण्डोः राजा च यथा मुखडा नृत्यस्य पृष्टषोषकाः आसन् तथैव झाडग्रामस्य नृपाः अपि एकप्रकारस्य मुखडानृत्यस्य पृष्ठपोषकाः आसन्। अस्याः मुखडायाः (अर्थात् मुखाच्छादकस्य) निर्माणं कदम्बशिरीषादिभिः पुष्णैः तथा कोमलकाष्ठैः भवति। काष्ठनिर्मितं मुखाच्छादकं (मुखडां) शिल्पिनः मुखे संस्थाप्य लघुकाष्ठशलाकया तत् बद्ध्यते स्म अतः तद्धृत्वा कृतं नृत्यं 'कोठियामुहडा, काठियामुखडा मुखडा' वा नृत्यं नाम्ना परिचितम्।

झाडग्रामे आदिवासिनः निम्नवर्गीयाः हिन्दवः यथा पाइकप्रजाः शारीरिककौशलं दर्शनाय दण्डक्रिडायां नृत्यन्ति स्म, तथा काष्टस्य मुखाच्छादकं (मुखडां) धृत्वा नृत्यन्ति स्म। मुखडां धृत्वा कृतस्य अस्य नृत्यस्य नाम 'काठियामुखडानृत्यं, काठिया-महडा-नृत्यं वा। झाडग्रामस्य जनैकः लोकशिल्पी शक्तिपदमाइतिः यः तस्य पित्रा मङ्गलमाइतिमहोदयेन सह नाचनिनृत्यस्य समूहे नृत्यं करोति स्म। तेन उक्तं काष्ठमुखोशनामके मुखाच्छादके नेत्रस्य स्थाने छिद्रं नासीत्। यः मुखाच्छादं धरति तं गृहीत्वा नृत्यस्थाने प्रापयन्ति जनाः, तत्र स न दृष्ट्ववै नृत्यति स्म। नृत्यस्थाने एकः गीतं गायति स्म, वादकाः

वादयन्ति स्म। गीतारम्भात् परं एकः सहकारी मुखड़ाधारिणं शिल्पिनं तत्र आनयति स्म। तत्र स शिल्पी गीतस्य कथां वाद्यशब्दस्य तालसहितं गीतं श्रुत्वा नृत्यति स्म। नृत्यान्ते पुनः सहकारी शिल्पिनं धृत्वा नृत्यस्थानतः अनत्र नयति स्म। अतः भिन्नगीते भिन्नं मुखाच्छादकं धृत्वा नृत्यति स्म। काष्ठस्य इदं मुखाच्छादकं (मुखड़) बहुविधं भवति स्म यथा पुरुषमुखडा, नारीमुखडा, राक्षसमुखडा, व्याघ्रमुखडा, सिंहमुखडा चेत्यादयः।

चिलकिगडस्य गडनृपाः आसन् झाड़ग्रामस्य गड़नृपाणां मित्राणि। तयोः द्वयोः परिवारयोः वैवाहिकसम्पर्कः अपि आसीत्। वनभूम्यावृतस्य गडराज्यस्य चिलकिगडस्य धवलदेवनृपाः आसन् अतीव प्रजावत्सलाः संस्कृतिमनस्काश्च। चिलकिगडे प्रथमे त्रिपाठीब्राह्मणराजवंशः अनन्तरं च सिंहमत्तगजवंशः राजत्वं कृतवन्तौ। अस्य मत्तगजराजवंशस्य अन्तिमः राजा आसीत् गोपीनाथसिंहमत्तगजः। गोपीनाथस्य कोऽपि सन्तानः नासीत्। अतः सः वनदुर्गायाः दुर्गामणेः समीपे उक्तवान्(मानत इति कृतवान्) यत् तस्य यदि सन्तानः भवति तर्हि स दुर्गामणिदेव्याः मन्दिरं करिष्यति इति। अथ तस्य एका कन्या जाता। तस्याः नाम आसीत् सुवर्णमणिः इति। तदा गोपीनाथेन प्रायशः 1789 ईशवीयाब्दे दुर्गामणेः मन्दिरं निर्मितवान्। अधुना कनकदुर्गायाः (पूर्वनाम दुर्गामणिः) नूतनस्य मन्दिरस्य समीपे यत् पुरातनं मन्दिरं वर्तते तदस्ति प्रायशः 1789 ईशवीयाब्दे गोपीनाथसिंहमत्तगजेन निर्मितं कनकदुर्गायाः मन्दिरमिति। (एतत् पञ्चदशशतकस्य विष्णुमन्दिरं नास्ति, एतदस्ति शाक्तिपीठम्। पूर्वम् अत्र नरवलिः भवति स्म, वर्तमाने अत्र अजस्य वलिः भवति। वस्तुतः वर्तमाने पञ्चदशशतकस्य किमपि गृहं मन्दिरं वा समग्रे झाड्ग्रामभूखण्डे अक्षतं नास्ति। गोपीनाथसिंहस्य मृत्योः परं तस्याः ज्येष्ठा राज्ञी गोविन्दमणिः 1818 ईशवीयाब्दं यावत् राजत्वं कृतवती। तस्याः मृत्योः परं न्यायलयस्य आदेशानुसारं गोपीनाथसिंहस्य कन्या सुवर्णमणिः धलभूमिगडस्य राज्ञः जगन्नाथधवलदेवस्य पुत्रः कमलाकान्तधवलदेवः 1822 ईशवीयाब्दे चिलकिगडस्य राजा अभवत्। तथा वर्तमानधवलदेवराजवंशस्य राजत्वम् आरब्धम। कमलाकान्तकणकदुर्गायाः मन्दिरस्य समीपे तिहाडिटिपागडं त्यक्त्वा डुलुंनद्याः पश्चिमतटे चिलकाग्रामे नूतनं गृहं निर्मितवान्। कमलाकान्तधवलदेवस्य परं क्रमेण मानगोविन्दधवलदेवः (1831-1860), हरिहरधवलदेवः (1860-1867) कोर्ट अफ उयार्ड (1867-1881),पूर्णचन्दधवलदेवः(1881-1886)च,राजत्वं कृतवन्तः। ततः चितकिगडस्य सिंहासने उपविष्टवान् ईश्वरचन्दधवलदेवः।

**परभा नृत्यम्**

राजगृहजनानां मतानुसारम् ईश्वरचन्द्रधवलदेवः (1886-1894) आसीत् शारीरिकशक्तौ बलीयानः, संस्कृतिमनस्कः, शिल्परसिकः च राजा। सः तदा प्रचलितं सेराइकलाछोनृत्यं तथा ओडिशायां प्रचलितं छोनृत्यं, पुरुलियायाः छोनृत्यं झाडग्रामस्य च काठियामहड़ानृत्यं दृष्ट्वा स्वस्य राज्ये तस्य पाइकप्रजाभ्यः एकस्य विचित्रस्य मुखोशनृत्यस्य प्रचलनं कर्तुम् उद्योगी अभवत्।

तदा चिलकिगडराजगृहे शिवस्य गाजनोत्सवे द्वादशदिनानि यावत् उत्सवः भवति स्म। राजा ईश्वरचन्द्रः धवलदेवः झाड़ग्रामस्य काठियामुखडानृत्यस्य अनुकरणे एकस्य अभिनवस्य मुखडानृत्यस्य परिकल्पनां कृतवान्। स काठियामुखडानृत्येन सह पौराणिकवातावरणं निर्माय द्वादशदिवसेषु द्वादशदेवतानां मर्त्यं प्रति आगमनकल्पनां कृत्वा प्रत्येकस्यै देवतायै प्रतिदिनं पृथक् नृत्यस्य परिकल्पनां कृतवान्। सः द्वादश देवदेवीषु प्रत्येकस्य कृते मस्तकतः कटिदेशपर्यन्तं काष्ठनिर्मितं मुखाच्छादकं (मुखोश) निर्मितवान्। राजगृहे गाजनोत्सवस्य द्वादेश-दिनानि यावत् प्रत्येकस्यां रात्रौ एकैकस्य देवस्य मुखोशनृत्यकरणाय द्वादशमुखोशानां मुखाच्छादकानां वा निर्माणं तैः कृतम्। कटिदेशपयन्तं विस्तृतस्य अस्य काष्ठनिर्मितस्य मुखोशस्य मुखाच्छादकस्य वा नाम आसीत् परभा इति। परभां धृत्वा कृतस्य नृत्यस्य नाम आसीत् परभानृत्यम्। तेन (राज्ञा ईश्वरचन्द्रधवलेन) तदानीन्तनं सर्वापेक्षया अल्पभारयुक्तं काष्ठं संगृह्य तस्य राज्यस्य, श्रेष्ठन तक्षकेण (carpenter) काष्ठमुखोशं निर्मिणम्। केचित् वदन्ति तस्य तक्षकस्य नाम आसीत् कालामिस्त्री। सः कर्णेन सामान्यतया अल्पं शब्दं शृणोति स्म अतः सर्वे जनाः तं 'काला' इति वदन्ति स्म। कालामिस्त्री दिवानक्तं परिश्रमं कृत्वा राज्ञः निर्देशानुसारं परभां निर्मितवान्। जनश्रुतिः अस्ति यत् द्वादशपरभानां निर्माणात् परं सः कालामिस्त्री अदृश्यः अभवत्। ततः तस्य दर्शनं कृनापि न कृतम्।

एकैकेन काष्ठखण्डेन (वृक्षखण्डेन) एकैकस्याः परभायाः निर्माणं भवति स्म। कदापि द्वयोः काष्ठखण्डयोः संयोजनं न भवति स्म। पुरुलियायाः परभायाम् एकमेव केवलं मुखमण्डलमेव तिष्ठति। किन्तु चिलकिगड़स्य परभा मुखमण्डलात् कटिदेशपर्यन्तं आसीत्। चरित्रानुसारं प्रत्येकस्य मुखोशस्य पुरतः काष्ठस्य कुर्दनं कृत्वा यथा मुखं-नेत्रं-नासिका-कष्ठ-वक्षः-हस्तानां निर्माणं कृत्वा परभायाः भारं न्यूनी करोति तथैव पृष्ठतः काष्ठमपि कुर्दयित्वा दूरीकृत्य परभायाः भारं न्युनीकरोति। प्रत्येकस्याः परभायाः उच्चता सार्धद्विफुट् इतीतः त्रिफुट् परिमिता आसीत्। दीर्घः प्रायः द्विफुट् इति आसीत्। परभायाः अधः दश इञ्चि परिमितं कीलकं आसीत्। एतां परभां वंशेन निर्मितस्य 'ढाचा' इत्यस्य उपरि स्थापयति। कटिदेशस्य उपरिष्ठात् ढाँचांशं वस्त्रेण आच्छाद्य तथा स्थापयति यथा सा परभा एका दुर्गामूर्तिः इति। तस्य 'ढाचा' इत्यस्य अधः निष्ठति तस्याः देवतायाः बाहनम्। वहन सहिता परभा आसीत् दर्शने दुर्गामुत्तिः सदृशी। अधः स्थितस्य वाहनांशस्य नाम आसीत् 'कुमिरः' इति। वंशेन निर्मितस्य अस्य कुमिरस्य अन्तः कश्चित् प्रविष्टः परभां शनैः शनैः अग्रे नयति। पृष्ठतः नारीवस्त्रं धृत्वा केचन् पुरतः गच्छन्ति। अस्याः परभायाः पुरतः केचन वाद्ययन्त्रं वादयन्तः शनैः शनैः नृत्यं कुर्वन्तः अग्रे गच्छन्ति। तद् दृष्ट्वा मन्यते यत् काचित् देवता मर्त्यम् आगच्छति चिलकिगडस्य गाजनोत्सवे भागग्रहणाय इति। द्वादशदेवतानां मर्त्यागमनम् उपलक्ष्य द्वादशपरभानां द्वादशनृत्यानि परभानृत्यानि उच्यन्ते। मुखटायाः व्यवहारं विना तथाकथितेन छोनृत्येन सह किमपि सादृश्यं नास्ति। गाजनोत्सवस्य दिवसे वररूपस्य शिवस्य भूतप्रेतादीनां सहचराणां मुखटां धृत्वा कृतं नृत्यं यदि छोनृत्यं भवति तर्हि शिवस्य गाजनोत्सवे द्वादशदेवतानां स्वर्गतः मर्त्यागमनस्य इदं मुखटां धृत्वा नृत्यं भवति परभानृत्यम्।



राज्ञा ईश्वरचन्द्रेण तेन तक्षकेण (कालामिस्त्री) आहत्य द्वादशपरभाः निर्मिताः। ताः द्वादश परभाः भवन्ति- गणेशः, कार्तिकः, शिवः, दशभूजा, अरूणः, वरुणः, अष्टभुजा, शिवदुर्गा, चतुर्भुजा, गौराङ्गः, पवनः, यमः चेति। राज्ञा चिलकिगडस्य निवासी दण्डछत्रमाझिः प्रजाः नीत्वा एकं नृत्यदलं निर्मितवान्।

एकैका परभा यदा सभां प्रविशति तदा परभां तस्याः वाहनं च द्वौ जनौ घृत्वा निष्ठतः। परभा यदा सभां प्रति प्रविशति तदा केचन पुरुषाः महिलानां वस्त्रेण सज्जिताः सन्तः वाद्यस्य तालेन सह नृत्यं कुर्वन्ति। प्रत्येकस्याः परभायाः वाद्यतालं भिन्नं भवति। परभानृत्ये वाद्यस्य तालानुसारेण नृत्यमेव परभानृत्यम्। नृत्यस्य दर्शनेन मन्यते यत् एकः देवता स्वर्गतः मर्त्यम् आगच्छति, एवमेव मर्त्यवासिनः तं नृत्यं कुर्वन्तः शोभायात्रां कृत्वा आनयन्ति।

राजगृहस्य वर्तमानः सदस्यः तेजेशचन्द्रधवलदेवः उक्तवान् यत् तेन श्रुतं यत् राजा ईश्वरचन्द्रः एव परभामुखटां निर्मितवान् सः स्वयमपि अस्मिन् परभानृत्ये भागग्रहणं करोति स्म। तस्य सर्वे नाविकप्रजाः अपि नृत्यन्ति स्म। अतः अष्टादशशतके चुयाडविद्रोहस्य काले विद्रोहिणां पाइकजनानां शारीरिकमानसिकोत्तेजनावर्धनाय चिलकिगडस्य राजा गोपीनाथसिंहः मत्तगज इति परभामुखटां निर्माय परभानृत्यस्य प्रचलनं कृतवान्। इति एतादृशी धारणा भ्रान्ता। केवलं राजगृहस्य सदस्यः न अपि च चिलकिगड़स्य अशीतिपरपरभानृत्यस्य शिल्पिनः अपि राजा ईश्वरचन्द्रधवलदेवः एव परभानृत्यस्य प्रवर्तकः इति मन्यन्ते।

चिलकिगड़स्य द्वौ प्रवीणौ परभानृत्यस्य शिल्पिनौ स्तः भुतनाथसिं भगीरथसिं चेति। तयोः वयः नवतिः इति। बहुदिनेभ्यः पूर्वं तौ परभानृत्यं त्यक्तवन्तौ। तौ उक्तवन्तौ चिलकिगडस्य परभानृत्यार्थं राजा ईश्वरचन्द्रः येन तक्षकेण द्वादशपरभाः निर्मितवान् तस्मै बहु धनं दत्त्वा तस्य दक्षिणहस्तस्य वृद्धाङ्गुलिं कर्तितवान् येन अपरेण केनापि एतादृश्याः परभायाः निर्माणं कर्तुं न शक्यते। तौ एतदपि उक्तवन्तौ यत् चैत्रमासे राजगृहस्य शिवस्य यः गाजनोत्सवः भवति स्म, तत्र द्वादशदिनानि यावत् मेला भवति स्म, प्रत्यहं रात्रौ एकैकां परभां स्वीकृत्य नृत्यं भवति स्म। अतः द्वादश परभाः निर्मिताः भवन्ति स्म।

भूतनाथभगीरथाभ्यां सह तदा शशधररायः शशधरगिरिश्चापि परभानृत्ये भागग्रहणं कुरुतः स्म। तैः सह चिलकिगडराजपरिवारस्य वीरेणदेओधवलदेवः, समरेशदेओ धवलदेवोऽपि परभानृत्ये भागग्रहणं कुरुतः स्म। भुतनाथेन उक्तं काष्ठस्य परभां निर्माति स्म कश्चित दक्षः तक्षकः। परभानिर्माणे कियत् परिमाणम् अर्थव्यायं भवति स्म तस्य किमपि तथ्यं न प्राप्यते। सर्वोपरि परभाशिल्पिनः आवश्यकमासीत् बलम्। यतः अधिकभारयुक्ता याः : परभायाः वहनं अतीव कष्टकरम् आसीत्। तदर्थं जनाः अपि न लभन्ते स्म।

वर्तमाने चिलकिगडस्य एकः परभाशिल्पी वल्लभखामरूई मित्रं शिवशङ्करं तथा काञ्चन जनान् खीकृत्य चिलकिगडराजगृहैव एकस्मिन् प्रकोष्ठे चिलकिगडछोदलम् उत मनसाछोदलं नाम्ना एकां नृत्यदलं निर्माय परभानृत्यस्य प्रवाहं रक्षितवान्। अस्य दलस्य प्रमुखः आसीत् बल्लभखामरुइ । स स्वयं वाद्यं (ढाक) वादयति। बल्लभेन उक्तं अधुना द्वादशदिनानि यावत् परभानृत्यं न भवति। केवलं एकस्मिन् एव दिने परभानृत्यं भवति। द्वादशदिनानि यावत् कृतस्य नृत्यस्य संक्षिप्तानि द्वादशदृश्यानि अधुना वर्तन्ते। प्रत्येकयोः द्वयोः दृश्ययोः अन्तः एकं विनोदनदृश्यं वर्तते। प्रथमे आरभ्यते एकेन गणकठाकुरेण सह ग्रामस्य बृद्धायाः राजगृहस्य च भल्लुकस्य विनोदनदृश्यम्।

सूचनादृश्यमेतादृशं भवति यत् गणकठाकुरः वनस्य स्पार्शस्थेन मार्गेण गच्छति। ग्रामस्य एका वृद्धापि तस्मिन् वने 'महुल' इति स्वीकर्तुं गच्छति। वृद्धायाः इच्छा वर्तते गणकठाकुरः (ज्योतिषी) तस्याः हस्तरेखाम् एकवारं पश्येत्। सा वदति- गणकठाकुर ! गणकठाकुर ! कृपया मम हस्तम् एकवारं पश्यतु। अनन्तरं बृद्धागणकयोः बहु वार्तालापनं भवति। अकस्मात् सभायां भल्लुकस्य मुखटां धृत्वा एकस्य प्रवेशः भवति तदा द्वौ जनौ तस्याः पलायतः भल्लुकः अपि तेषां पृष्ठतः गच्छति। अथ गणेशः परभा सभां प्रविशति। तस्य पुरतः भवतः गीतं नृत्यञ्च। ततःपरं पुनः एकं विनोदनदृश्यं भवति। अथ भवति कार्तिकपरभानृत्यम्। ततः परं पुनः विनोदनदृश्यं, तस्मात् परं शिवपरभायाः नृत्यं भवति। एवमेव क्रमेण चलन्ति द्वादश परभानृत्यानि।

**वर्तमाने परभानृत्यस्य स्थितिः**

वर्तमाने चिलकिगड़राजवंशस्य कनिष्ठराजकुमारस्य तेजेशचन्द्रधवल-देवस्य उत्साहेन 'चिलकिगडमामनसाछो' नाम्ना तस्य प्राचीनस्य परभानृत्यस्य दलस्य पुनः स्थापना अभवत्। तेन उक्तं- यद्यपि तेषां समीपे परभानृत्यदलस्य स्थापना अभवत् किन्तु तेषां समीपे एकापि परभा नासीत्। काष्ठनिर्मिताः प्राचीनाः परभाः राजगृहात् संगृह्य सर्वकारस्य झाड़ग्रामतथ्यसंस्कृतिविभागे संरक्षिताः भवन्ति। एतासां काष्ठपरभानां सदृश्यः द्वादश फाइवारपरभाः सर्वकारोद्योगेन कार्यालये स्थिताः वर्तन्ते। यदा सर्वकारोद्योगेन कुत्रापि परभाछोनृत्यस्य अनुष्ठानं भवति तदा शिल्पिनः ताः परभाः स्वीकृत्य धृत्वा च अनुष्ठानं कुर्वन्ति स्म। अथ अनुष्ठानान्ते कार्यालये प्रत्यावर्तयन्ति। सर्वदा सर्वकारकार्यालयतः अनुष्ठानार्थं परभाः न प्राप्यन्ते। अतः सर्वदा परभाछोनृत्यं न सम्भवति। अतः शिल्पिनां रक्षार्थं ते परभानृत्यने सह पुरुलियायाः छोनृत्यस्य अपि व्यवस्थां कुर्वन्ति।

प्रसङ्गतः वक्तव्यं यत् पुरुलियायाः मुमूर्षुछोनृत्यं यथा 1978 ईशवीयाब्दे आशुतोषमहोदयस्य उद्योगेन विदेशयात्रोपलक्ष्ये पुनः जीवनं प्राप्तं तथैव काचित् घटना चिलकिगडस्य परभानृत्यं स्वीकृत्य नाभवत्। अस्य परभानृत्यस्य कथा जामवनेः वहिः तथा प्रसारिता नाभवत्। वहिष्ठात् आह्वयनस्य अभावे नृत्यं कथं रक्षितं भवति। तृतीयतः राजगृहे द्वादशमुखटाः विना परभामुखटानिर्माणस्य कश्चिदपि तक्षकः न प्राप्यते। झाडग्रामस्य तथ्यसंस्कृतिकार्यालये काष्ठनिर्मितायाः

परभायाः मुखटा, फरवारनिर्मितायाः परभायाः मुखटा वर्तते। आवेदनं कृत्वा सर्वदा परभामुखटाम् आनीय परभानृत्यस्य आयोजनं न सम्भवति। परभाछोनृत्यस्य दले प्रधानतः पञ्चदशजनाः तिष्ठन्ति। तेषु त्रयः जनाः वाद्ययन्त्राणि वादयन्ति द्वादशजनाः च नर्तकाः भवन्ति। एतेषु पुनः एकः दलप्रधानः भवति। सहकारिरूपेण पुनः पञ्चचत्वारः वा जनाः तिष्ठन्ति। चिलकिगडस्य 'मा-मनसा-परभा-छोनृत्यदले पञ्चदश सदस्यानां नामानि भवन्ति यथा- शिवशङ्करसिं (दलप्रधानः) बल्लभखामरूइ (ढाकयन्त्रवादकः) दिलीपखामरुइ, जितेन-देहुरिः बिष्णुपदधलः, गौराङ्गधलः, मानिकटेकिः (ढोलवादकः), शक्तिपद कोटालः, रामुखामराई, भोलाधाँउड़िया, वनुजालः, तापसखामरुइ, मदनदण्डपाट, रविदोलइ चेति।

परभानृत्यस्य दले 'ढाक' इत्यस्य वादकः एव प्रधानः भवति। तस्य ढाकयन्त्रस्य तालं नृत्यं नियन्त्रयति। द्वादशपरभानृत्यार्थं द्वादशप्रकाराः तालाः आवश्यकाः। आदौ चिलकिगडे परभाछोनृत्यस्य जन्मनः परमपि ढाकवादकाः आसन् पार्श्ववर्तिनः ग्रामस्य जनाः। परभाछोनृत्यस्य कथा जामवणेः बहिः बहु प्रचारिता न आसीत्, अतः इदं नृत्यं क्रमशः लुप्तं भवति। 2019 ईशवीयाब्दे दुवडायाः डोलवाद्यवादकानां प्रचाराभावे इदं नृत्यं क्रमशः लुप्तं भवति। यदा 2019 ईशवीयाब्दे दुवडायाः 'ढाकढोल' इत्यनयोः वाद्ययन्त्रयोः वादकानाम् अभावे अर्थात् चिलकिगडस्य परभानृत्ये ढाकढोल इत्यनयोः वादकानाम् अभावे परभानृत्यं लुप्तं भवति स्म, किन्तु तथा दुवडायाः परिमलदलुइ-महोदयस्य नेतृत्वेन पाइकनृत्यदलस्य शिल्पिभिः सह मिलित्वा पुनः दुवडायां परभानृत्यदलस्य गठनं कृतवान्। अस्मिन् कर्मणि सहयोगितां कृतवान् चिलकिगढस्य जनैकचाङ्गुनृत्यस्य शिल्पी भुवनखामरुइ-महोदयः। भुवन चाङ्गुनृत्यस्य शिल्पी सन्नपि चिलकिगड्स्य परभानृत्यदलेन सह स्थित्वा नृत्यस्य सर्वान् विषयान् ज्ञातुं शक्तवान्। एवं दुवडाछोनृत्यदलं निर्मितम्। ते नर्तकाः झाडग्रामे तथ्यसंस्कृतिकार्यालये सम्पर्कं कृत्वा कार्यालयतः परभामुखताः स्वीकृत्य परभानृत्यं मञ्चस्थं कृतवन्तः। दुवडादले स्थितानां शिल्पिनां नामानि भवन्ति- परिमलदलाइ (दलप्रधानः), माधवसिं, पाण्डव-मल्लिकः, जितेनमल्लिकः, चित्रजालः, निताइखामरुइ, त्रिगुणदलाइ, खोकनसिं, हरेणखामरुइ, सुबोधशीटः, वावलुदलाई, रतनमल्लिकः, नुदुमल्लिकः चेति।

परभाछोनृत्यं पुरुषाणां नृत्यम्। अस्मिन् महिलानां भागग्रहणं नास्ति। नारीचरित्रस्य नृत्यं पुरुषाः एव कुर्वन्ति। तदर्थं काचित् प्रस्तुतिः न आवश्यकी। अस्माभिः क्षेत्रसमीक्षाकाले भूवनखामरुइ-महोदयात् परभानृत्यविषये ज्ञातम्। तेन स्पष्टतया उक्तं 'स परभानृत्य-विषये सविशेषं न जानाति, वस्तुतः सः एकः चाङ्गुनृत्यस्य शिल्पी। किन्तु बाल्यकालात् परभानृत्यं दृष्ट्वा यावत् ज्ञातुं शक्तवान् तावता एव दुवडापरभानृत्यदलगठने साहाय्यं कृतवान्।

दवडायाः मुख्यढाकवादकः मनोरञ्जनकालिन्दिः पियारिवैठा च एकदा चिलकिगडस्य परभानृत्यदलस्य ढाकवादकः आसीत्। वर्तमाने पियारिवैठामहोदयस्य भ्राता नदुवैठा पियारिमहोदयस्य पुत्रः अजित-वैठा दुवडादले ढाकवाद्ययन्त्रं वंशीं च वादयतः, पुनः रञ्जितवैठा ढोलवाद्यं वादयति।

**निष्कर्षः**

चिलकिगडस्य दुवडायाः च परभां स्वीकृत्य क्षेत्रसमीक्षायाः समये मम अन्यतमा सहयोगिनी आसीत् मम सखी गवेषककर्ती मान्तुमितरः। आवां क्षेत्रसमीक्षायां दृष्टवत्यौ यत् परभामुखटायाः आदिरूपस्य कल्पना कृता वर्तते झाड़ग्रामराजगृहे अनुष्ठितस्य काठियामुखटायाः अनुकरणे। झाडग्रामस्य जङ्गलमहलस्य एतत् ऐतिह्यं वर्तमाने विलुप्तप्रायम्। विलुप्तितः रक्षार्थं काष्ठस्य परभानां संरक्षणम् आवश्यकम्। सर्वकारेण चिलकिगडस्य परभानृत्यस्य स्वीकृतिः दातव्या। चिन्तनीयः विषयः भवति 2019 ईशवीयाब्दे दुवडायाः परभानृत्यं सर्वकारेण स्वीकृतम्, किन्तु चिलकिगडस्य परभानृत्यं न स्वीकृतम्। लुप्तप्रायस्य परभानृत्यस्य गौरवमयम् अस्तित्वं रक्षणाय द्वयो नृत्ययोः स्वीकृतिः सर्वकारेण दातव्या।

**संन्दर्भग्रन्थसूची**


- मुखोपाध्याय, सुब्रतकुमार (2021), झाडग्राम के लोकसम्पद और संस्कृति, कोलकाता, शरत् इम्प्रेशनस प्रा.लि.।
- कर्मकार, लक्ष्मण(2024), सृजन, इम्प्रेसन ओयार्ल्ड, घाटाल, पश्चिम मेदिनीपुर।
- वत्स्यायन, कपिला. भारतीय लोक नृत्य. संगीत नाटक अकादमी, नई दिल्ली।
- गर्ग, लक्ष्मीनारायण. भारत के लोक नृत्य. संगीत कार्यालय, हाथरस।
- सामर, देवीलाल. भारतीय लोकनृत्य. भारतीय लोक कला मण्डल, उदयपुर।
- चौहान, विजय. भारत के लोकनृत्य. आत्माराम एंड संस, दिल्ली।
- परमार, श्याम. लोकधर्मी नाट्य. मध्य प्रदेश हिन्दी ग्रंथ अकादमी, भोपाल।
- देवी, रागिनी. डांस डायलेक्ट्स ऑफ इंडिया (Dance Dialects of India). मोतीलाल बनारसीदास पब्लिशर्स।